
अर्हम्

श्रीयशोविजयजैनग्रन्थमाला [१७]



मलधारिश्रीराजशेखरसूरिविरचितः

षड्दर्शनसमुच्चयः ।



शास्त्रविशारदजैनाचार्यश्रीविजयधर्मसूरिपादा-
म्भोजचञ्चरीकायमाणाभ्यां
पं-श्रावकहरगोविन्ददास-बेचरदासाभ्यां संशोधितः ।



स च

वाराणस्यां

श्रेष्ठिभूराभाईतनुजहर्षचन्द्रेण निजधर्माभ्युदययन्त्रालये
मुद्रितः प्रकाशितश्च ।

द्वितीयावृत्तिः । मूल्यम् ।)

प्रस्तावना ।

सत्स्वपि प्रभूतभेदभिन्नेषु नानादर्शनेषु मुख्यतया. मन्तव्यानामनतिपार्थक्येनाऽन्येषामन्यत्राऽन्तर्भावेन च मूलभेदानाश्रित्य तावज्जैन-सांख्य-जैमिनीय-न्याय-वैशेषिक-सौगतलक्षणानि, जैन-सांख्य-जैमिनीय-न्याय-सौगत-चार्वाकस्वरूपाणि वा षडेव दर्शनानि प्रसिद्धानि । उपनिबद्धानि च तानि तैस्तैर्महामतिभिस्तत्र तत्र शास्त्रेष्वतिविविक्तविस्तृततया । किन्तु बहुप्रयाससाध्यत्वेन दुरवगाहत्वेन च तानि न भवन्त्यलं विस्तारमुपेचिक्षिपूणां संक्षेपं च प्रतिपित्सूनां मन्दमतीनां विधातुमुपकारम् । इति संक्षेपरुचींस्ताननुग्रहीतुं बहूपयोगिनं ग्रन्थमिमं व्यरचन् मलधारिश्रीराजशेखरसूरयः । लघीयानप्ययं ग्रन्थः षण्णामपि दर्शनानामभीष्टदेवतातत्त्वव्यतिरिक्तानां तत्तद्गुरुवेषाचरणग्रन्थादीनामप्यवश्यावसेयानामाम्नातानां प्रत्यायकत्वेन तत्तदनभिज्ञानां सर्वेषामप्यत्युपादेयतामावहतीत्यत्र केन किं वक्तव्यम् ? । अमुमेवोपजीव्य तार्किकचक्रमौलिमौलीयितपूज्यपादश्रीहरिभद्रसूरिकृतषड्दर्शनसमुच्चयस्य टीकायां विद्वद्वरश्रीगुणरत्नसूरयोऽपि तत्तत्स्थलेषु तत्तद्दर्शनाभिमतगुरुवेषादीन् प्रत्यपीपदन् ।

एतेषां श्रीराजशेखरसूरीणां हर्षपुरीयगच्छे समुत्पत्तिः, सत्तासमयश्च विक्रमसंवत् १४०५ रूप इति

"श्रीप्रश्नवाहनकुले कोटिकनामनि गणे जगद्विदिते ।
श्रीमध्यमशाखायां हर्षपुरीयाभिधे गच्छे ॥ १ ॥
मलधारिविरुदविदितश्रीअभयोपपदसूरिसन्ताने ।
श्रीतिलकसूरिशिष्यः सूरिः श्रीराजशेखरो जयति ॥ २ ॥
तेनाऽयं मृदुगद्यैर्मुग्धो मुग्धावबोधकामेन ।
रचितः प्रबन्धकोशो जयताज्जिनपतिमतं यावत् ॥ ३ ॥

तथा—

कट्टारवीरदुःसाधवंशमुकुटो नृपौघगीतगुणः ।
यच्चूलीपुरकारितजिनपतिसदनोच्छलत्कीर्तिः ॥ ४ ॥

वप्पकसाधोस्तनयो गणदेवोऽजनि सपादलक्षभुवि ।
तद्भूर्नूनकनामा तत्पुत्रः साढको दृढधीः ॥ ५ ॥
तत्सूनुः सामन्तस्तत्कुलतिलकोऽभवज्जगत्सिंहः ।
दुर्भिक्षदुःखदलनः श्रीमहम्मदसाहिगौरवितः ॥ ६ ॥
तज्जो जयति सिरिभवः षड्दर्शनपोषणो महणसिंहः ।
ढिल्ल्यां स्वदत्तवसतौ ग्रन्थमिमं कारयामास ॥ ७ ॥
शरगगनमनुमिताऽब्दे ज्येष्ठामूलीयधवलनवम्याम् ।
निष्पन्नमिदं शास्त्रं श्रोत्रव्येत्रोः सुखं तन्यात् " ॥ ८ ॥

इति तैरेव विनिर्मितस्य श्रीचतुर्विंशतिप्रबन्धस्य प्रशस्तितो निर्विसंवादं प्रतीतिगोचरीभवति । एभिरन्येऽपि स्याद्वादकलिका-श्रीस्याद्वादरत्नाकरावतारिकापञ्जिका-श्रीन्यायकन्दलीपञ्जिकादयो बहवो ग्रन्थाः प्राणायिषत । यैः स्वपरशास्त्रेषु निःसन्देहमवगम्यते तेषां विशदं वैशारद्यम् । किञ्च, तदानीन्तना अन्यगच्छीया अप्याचार्यास्तान् गुरुत्वेन संमानित्यकार्षुः समशूशुधंश्च तैस्तत्तद्विषयकान्स्वविरचयांचक्राणान् ग्रन्थानित्यपि ।

"रत्नाकरावतरिकावरटिप्पनं त-
ज्ज्ञानेन्दुरत्पतरधीः स्वमतिप्रवृद्ध्यै ।
तच्छिष्यको रचितवान् मलधारिपूज्य-
श्रीराजशेखरगुरोश्च निदेशमाप्य ॥ ८ ॥
श्रीराजशेखरगुरुर्गरिमाऽविधानं
तर्कागमाम्बुधिमहार्थजलाभिलाषी।
मद्वाक्यजातमखिलं तदनल्पदोषं
निर्दूषण व्यधित सत्प्रतिभाऽमितश्रीः"

इति पूर्णिमागच्छीय पं०-ज्ञानचन्द्रप्रणीतरत्नाकरावतारिकाटिप्पनप्रशस्तिप्रान्ततः,

"श्रीमान् हर्षपुरीयगच्छजलधिप्रोल्लासशीतद्युति-
र्वाणीभूषणराजशेखरगुरुः सौजन्यसंवासभूः ।
श्रीशान्तेश्चरितं व्यशोधयदिदं दुष्कर्ममर्मापहं
प्राज्ञैस्त्वैरपि शोध्यमेतदसमं कृत्वा प्रसादं मयि" ॥ ११ ॥

---

१ श्रीधरप्रणीतो वैशेषिकदर्शनप्रतिपादनपरो ग्रन्थः ।

इति कविपुरन्दरश्रीमुनिभद्रसूरिणा विक्रमार्कात् गगनेन्दुमनुमिते १४१० वर्षे निर्मितस्य श्रीशान्तिनाथमहाकाव्यस्य चरित्रप्रशस्तिभागतश्च स्फुटं प्रतीयते ।

ग्रन्थस्याऽस्य मुद्रणावसरे हस्तलिखितं पुस्तकमेकं मुनिश्रीदेवविजयस्य, अन्यच्चाणहिल्लपुरपत्तन(पाटन)स्थझवेरीवाडाश्रीपार्श्वनाथाह्वयभाण्डागारात् श्रेष्ठिवर्यहीराचन्द्रात्मजवाडीलालद्वारोपालप्सातां; इत्यत्र स्थले तयोर्धन्यवादपुरस्सरमुपकार उररीक्रियते । एवं च पुस्तकद्वयाधारेण संपादितेऽप्यस्मिन् ग्रन्थे दृष्टिदोषवशेन जाताः स्खलनाः सहृदयाः कृपां विधाय शोधयिष्यन्तीति—

प्रार्थयेते—

हरगोविन्द-बेचरदासौ ।



अर्हम्

श्रीविजयधर्मसूरिभ्यो नमः ।

मलधारिश्रीराजशेखरसूरिविरचितः

षड्दर्शनसमुच्चयः ।

नत्वा निजगुरून् भक्त्या स्मृत्वा वाग्भयदेवताम् ।
सर्वदर्शनवक्तव्यं वक्ति श्रीराजशेखरः ॥ १ ॥
धर्मः प्रियः सर्वलोके तं ब्रूयुर्दर्शनानि षट् ।
तेषां लिङ्गे च वेषे च आचारे दैवते गुरौ ॥ २ ॥
प्रमाणतत्त्वयोर्मुक्तौ तर्के भेदो निरीक्ष्यते ।
मुक्तिरष्टाङ्गयोगेनेत्येतत् साधारणं वचः ॥ ३ ॥
जैनं साङ्ख्यं जैमिनीयं यौगं वैशेषिकं तथा ।
सौगतं दर्शनान्येवं नास्तिकं तु न दर्शनम् ॥ ४ ॥
तत्र जैनमते लिङ्गं रजोहरणमादिमम् ।
मुखवस्त्रं च वेषश्च चोलपट्टादिकः स्मृतः ॥ ५ ॥
विस्तरस्त्वोघनिर्युक्तेर्ज्ञेयो वेषादिगोचरः ।
आचारः पञ्चसमितिगुप्तित्रितयलक्षणः ॥ ६ ॥
ईर्याभाषैषणाऽऽदाननिक्षेपोत्सर्गसंज्ञकाः ।
पञ्चाहुः समितीस्तिस्रो गुप्तीस्त्रियोगनिग्रहात् ॥ ७ ॥
तीर्थङ्कराश्चतुर्युक्ता विंशतिर्वृषभादयः ।
क्लिष्टाष्टकर्मनिर्मुक्ताः केवलज्ञानभास्कराः ॥ ८ ॥
महाव्रतधरो धीरः सर्वागमरहस्यवित् ।
क्रोधमानादिविजयी निर्ग्रन्थो गुरुरुच्यते ॥ ९ ॥

---

४ यौगमित्यनेन नैयायिकम् । नास्तिकं दर्शनं न तु, इत्यपि पाठः । ६-निर्युक्तौ, इति च पाठः ।

प्रत्यक्षं च परोक्षं च द्वे प्रमाणे इह स्मृते ।
तत्र प्रमेयं स्याद्वादाधिष्ठितं द्रव्यषण्मयम् ॥ १० ॥
धर्माधर्मौ नभः कालः पुद्गलश्चेतनस्तथा ।
द्रव्यषट्कमिदं ख्यातं तद्भेदास्त्वागमे स्मृताः ॥ ११ ॥
जीवाजीवौ तथा पुण्यं पापमाश्रवसंवरौ ।
बन्धो विनिर्जरामोक्षौ नवतत्त्वी मताऽर्हताम् ॥ १२ ॥
चैतन्यलक्षणो जीवः स्यादजीवस्ततोऽन्यथा ।
सत्कर्मपुद्गलाः पुण्यं पापं दुष्कर्मपुद्गलाः ॥ १३ ॥
कषाया विषया योगा इत्याद्या आश्रवा मताः ।
आश्रवाद्विरमणं यत् तत् संवर इति स्मृतः ॥ १४ ॥
शुभाशुभानां ग्रहणं कर्मणां बन्ध इष्यते ।
पूर्वोपार्जितकर्मौघजरणं निर्जरा स्मृता ॥ १५ ॥
कर्मक्षयेण जीवस्य स्वस्वरूपस्थितिः शिवम् ।
एषां नवानां श्रद्धाने चारित्रात्तत्तु लभ्यते ॥ १६ ॥
श्वेताम्बरा वन्द्यमाना धर्मलाभं प्रचक्षते ।
शुद्धां माधुकरीं वृत्तिं सेवन्ते भोजनादिषु ॥ १७ ॥
ख्याताः प्रमाणमीमांसा प्रमाणोक्तिसमुच्चयः ।
नयचक्रवालतर्कः स्याद्वादकलिका तथा ॥ १८ ॥
प्रमेयपद्ममार्तण्डस्तत्त्वार्थः सर्वसाधनः ।
धर्मसंग्रहणीत्यादितर्कौघा जिनशासने ॥ १९ ॥
जैने मत उभौ पक्षौ श्वेताम्बरदिगम्बरौ ।
श्वेताम्बरः पुरा प्रोक्तः कथ्यतेऽथ दिगम्बरः ॥ २० ॥
दिगम्बराणां चत्वारो भेदा नाग्न्यव्रतस्पृशः ।

---

११ नभःकालपुद्गलाः, इति च पाठः । १४ इत्यादिराश्रवो मतः, इत्यपि पाठः । १२ शिवं मोक्षः ! तत्तु शिवम् । २० जैनमार्गे, इति पाठान्तरम्, कथ्यते च, इति च पाठः ।

काष्ठासङ्घो मूलसङ्घः सङ्घौ माथुरगोप्यकौ ॥ २१ ॥
पिच्छिका चमरीवालैः काष्ठासङ्घे प्रतिष्ठिता ।
मूलसङ्घे मयूराणां पिच्छैर्भवति पिच्छिका ॥ २२ ॥
पिच्छिका माथुरे सङ्घे मूलादपि हि नाद्दता ।
मयूरपिच्छिका गोप्याः, धर्मलाभं भणन्ति ते ॥ २३ ॥
धर्मवृद्धिगिरः शेषाः, गोप्याः स्त्रीमुक्तिभाषिणः ।
गोप्यादन्ये त्रयः सङ्घाः प्राहुर्नो निर्वृतिं स्त्रियाः ॥ २४ ॥
शेषास्त्रयश्च गोप्याश्च केवलिभुक्तिं न मन्वते ।
नास्ति चीवरयुक्तस्य निर्वाणं सद्व्रतेऽपि हि ॥ २५ ॥
द्वात्रिंशदन्तरायाः स्युर्मलाश्चैव चतुर्दश ।
भिक्षाऽटने भवन्त्येषां वर्जनीयास्तदागमे ॥ २६ ॥
शेषं श्वेताम्बरैस्तुल्यमाचारे दैवते गुरौ ।
श्वेताम्बरप्रणीतानि तर्कशास्त्राणि मन्वते ॥ २७ ॥
स्याद्वादविद्याविद्योतात्प्रायः साधर्मिका अमी ।
परमष्टसहस्री या न्यायकैरवचन्द्रमाः ॥ २८ ॥
सिद्धान्तसार इत्याद्यास्तर्काः परमकर्कशाः ।
तेषां जयश्रीदानाय प्रगल्भन्ते पदे पदे ॥ २९ ॥
जिनकल्पादयो भेदा व्युच्छिन्नाः साम्प्रतं कलौ ।
वर्त्तमानं ततः प्रोक्तं सर्वं ज्ञेयं जिनागमात् ॥ ३० ॥
सम्यग् जैनं मतं ज्ञात्वा योगेऽष्टाङ्गे रमेत यः ।
स कर्मलाघवं कृत्वा लब्धा सौख्यपरम्पराम् ॥ ३१ ॥

॥ इति जैनमतम् ॥

---

२२ प्रकीर्तिता, इति च पाठः । २३ गुप्ताः । धर्मलाभं गृणन्ति ते, इत्यपि पाठः । २८–विद्याविद्यैरित्यपि पाठः । २९ तेषां च·· स्त्रीमोक्षाय विवादोऽपि पदे पदे । ३१ जैनमतमिति च पाठः ।

अथ साङ्ख्यमतं ब्रूमस्ते त्रिदण्डैकदण्डकाः ।
कौपीनं वसनं तेषां धातुरक्ताम्बराश्च ते ॥ ३२ ॥
क्षुरमुण्डा एणचर्मासना द्विजगृहाशनाः ।
पञ्चग्रासीपराश्चैव द्वादशाक्षरजापिनः ॥ ३३ ॥
ॐ नमो नारायणाय तद्भक्ताः प्रवदन्त्यदः ।
प्रणामकाले तेऽप्याहुः पदं तत्तु नमोऽन्तकम् ॥ ३४ ॥
बीटेति भारते ख्याता दारवी मुखवस्त्रिका ।
दयानिमित्तं भूतानां मुखनिःश्वासरोधिका ॥ ३५ ॥
यदाहुस्ते—
घ्राणादनुप्रयातेन श्वासेनैकेन जन्तवः ।
हन्यन्ते शतशो ब्रह्मत्रणुमात्राक्षरवादिना ॥ ३६ ॥
दयार्थं जलजीवानां गलनं धारयन्ति ते ।
शास्त्रेष्वपदिशन्त्येवं भक्तानां पुरतः सदा ॥ ३७ ॥
षट्त्रिंशदङ्गुलायामं विंशत्यङ्गुलविस्तृतम् ।
दृढं गलनकं कुर्याद् भूयो जीवान् विशोधयेत् ॥ ३८ ॥
म्रियन्ते मिष्टतोयेन पूतरा. क्षारसम्भवाः ।
क्षारतोयेन तु परे न कुर्यात् सङ्करं ततः ॥ ३९ ॥
लूताऽऽस्यतन्तुगलितैकबिन्दौ सन्ति जन्तवः ।
सूक्ष्मा भ्रमरमानास्ते नैव मान्ति त्रिविष्टपे ॥ ४० ॥
कुसुम्भकुङ्कुमाम्भोवन्निचितं सूक्ष्मजन्तुभिः ।
न दृढेनापि वस्त्रेण शक्यं शोधयितुं जलम् ॥ ४१ ॥

(उत्तरमीमांसायां गलनकविचारोऽयम्)

साङ्ख्या निरीश्वराः केचित् केचिदीश्वरदेवताः ।
ये ते निरीश्वरास्तेऽमी नारायणपरायणाः ॥ ४२ ॥

---

३६ ब्रह्माणुमात्राक्षरवादिनामित्यपि पाठः । ४१ अयं श्लोकः पुस्तकान्तरे नोपलभ्यते । २२ ये ते अनीश्वरा., इति पाठान्तरम् ।

विष्णोः प्रतिष्ठां कुर्वन्ति साङ्ख्यशासनसूरयः ।
चैतन्यप्रमुखैः शब्दैस्तेषामाचार्य उच्यते ॥ ४३ ॥
प्रत्यक्षमनुमानं च शाब्दं चेति प्रमात्रयम् ।
अन्तर्भावोऽत्र शेषाणां प्रमाणनां सयुक्तिकः ॥ ४४ ॥
अमीषां साङ्ख्यसूरीणां तत्त्वानां पञ्चविंशतिः ।
सत्त्वं रजस्तमश्चेति ज्ञेयं तावद् गुणत्रयम् ॥ ४५ ॥
एतेषां या समाऽवस्था सा प्रकृतिः किलोच्यते ।
प्रधानाव्यक्तशब्दाभ्यां वाच्या नित्यस्वरूपिका ॥ ४६ ॥
ततः संजायते बुद्धिर्महानिति यकोच्यते ।
अहङ्कारस्ततोऽपि स्यात् ततः षोडशको गुणः ॥ ४७ ॥
स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रं च पञ्चमम् ।
पञ्च बुद्धीन्द्रियाण्याहुस्तथा कर्मेन्द्रियाणि च ॥ ४८ ॥
पायूपस्थवचःपाणिपादाख्यानि मनस्तथा ।
अन्यानि पञ्चरूपाणि तन्मात्राणीति षोडश ॥ ४९ ॥
रूपात्तेजो रसादापो गन्धाद् भूमिः स्वरान्नभः ।
स्पर्शाद्वायुस्तथा चैवं पञ्चभ्यः पञ्चभूतकम् ॥ ५० ॥
एवं चतुर्विंशतितत्त्वरूपं निवेदितं साङ्ख्यमते प्रधानम् ।
अन्यश्च कर्त्ता विगुणश्च भोक्ता तत्त्वं पुमान् नित्यचिदभ्युपेतः ॥५१॥
अमूर्त्तश्चेतनो भोगी नित्यः सर्वगतोऽक्रियः ।
अकर्त्ता निर्गुणः सूक्ष्म आत्मा कापिलदर्शने ॥ ५२ ॥
प्रकृतेर्विरहो मोक्षस्तन्नाशे स स्वरूपगः ।
बध्यते मुच्यते चैव प्रकृतिः पुरुषो न तु ॥ ५३ ॥
साङ्ख्यानां मतवक्तारः कपिलासुरिभार्गवाः ।
उलूकः पञ्चशिखश्चेश्वरकृष्णस्तु शास्त्रकृत् ॥ ५४ ॥

---

५३ पुरुषोऽक्रियः, इति पाठान्तरम् ।

तर्कग्रन्था एतदीया माठरस्तत्त्वकौमुदी ।
गौडपादाऽऽत्रेयतन्त्रे साङ्ख्यसप्ततिसूत्रयुक् ॥ ५५ ॥
काश्यां प्राचुर्यमेतेषां बहवो मासोपवासिकाः ।
धूम्रमार्गानुगा विप्रा अर्चिर्मार्गानुगास्त्वमी ॥ ५६ ॥
वेदप्रियास्ततो विप्रा यज्ञमार्गानुगामिनः ।
हिंसादिवेदविन्नाः साङ्ख्या अध्यात्मवादिनः ॥ ५७ ॥
स्वकीयस्य मतस्यैते माहिमानं प्रचक्षते ।
यदि साङ्ख्यमते भक्तिस्तदा मुक्तिर्विना क्रियाम् ॥ ५८ ॥

उक्तं च माठरप्रान्ते-

हस पिब लल खाद मोद नित्यं भुङ्क्ष्व च भोगान् यथाऽभिलाषम् ।
यदि विदितं ते कपिलमतं तत् प्राप्स्यसि मोक्षसौख्यमचिरेण ॥५९॥

इति साङ्ख्यमतम् ।

अथ मीमांसकं ब्रूमो जैमिनीयापराभिधम् ।
जैमिनीया एकदण्डात्रिदण्डा अपि साङ्ख्यवत् ॥ ६० ॥
मीमांसको द्विधा कर्मब्रह्ममीमांसकस्तथा ।
वेदान्ती मन्यते ब्रह्म कर्म मट्टप्रभाकरौ ॥ ६१ ॥
ते धातुरक्तवसना मृगचर्मोपवेशिकाः ।
कमण्डलुधरा मुण्डा भट्टाः प्राभाकराश्च ते ॥ ६२ ॥
वेदान्तध्यानमेवैकमाचारस्तैरुरीकृतः ।
तेषां मते नास्ति देवः सर्वज्ञादिविशेषणः ॥ ६३ ॥
तस्मादतीन्द्रियार्थानां साक्षाद् द्रष्टुरभावतः ।
नित्येभ्यो वेदवाक्येभ्यो यथार्थत्वविनिर्णयः ॥ ६४ ॥
अत एव पुरा कार्यो वेदपाठः प्रयत्नतः ।

५५-सूत्रकृत् । इति च पाठः । ५७-यज्ञमार्गानुयायिनः, इति च पाठः ।
५९-यथाऽभिकामम्, इत्यपि पाठः । । ६२-चर्मोपवेशिनः, इत्यपि पाठः ।

ततो धर्मस्य जिज्ञासा कर्तव्या धर्मसाधनी ॥ ६५ ॥
नोदनालक्षणो धर्मो नोदना तु क्रियां प्रति ।
प्रवर्त्तकं वचः प्राहुः स्वःकामोऽग्निं यथा यजेत् ॥ ६६ ॥
वेद एव गुरुस्तेषां वक्ता कश्चित्परो न हि ।
ततः स्वयं ते संन्यस्तं संन्यस्तमिति भाषिणः ॥ ६७ ॥
यज्ञोपवीतं प्रक्षाल्य पिबन्ति तज्जलं शुचि ।
एते साङ्ख्यानुगा वेषात् तत्त्वेऽतिमहती भिदा ॥ ६८ ॥
षट्प्रमाणस्पृशो भाट्टास्तन्नामानि प्रचक्ष्महे ।
प्रत्यक्षमनुमानं च शाब्दं चोपमया सह ॥ ६९ ॥
अर्थापत्तिरभावश्च भाट्टानां षट् प्रमाः स्मृताः ।
प्रभाकरमते पञ्च ते ह्यभावं न मन्वते ॥ ७० ॥
एकमेवाद्वितीयं स्याद् ब्रह्म तत्त्वं महाफलम् ।
प्रपञ्चः स्तम्भकुम्भादिस्तेषां शास्त्रे निरर्थकः ॥ ७१ ॥
मीमांसको द्विजन्मेवेत्यतः शूद्रान्नवर्जकः ।
न पौरुषकृता वेदाः पारम्पर्येण तद्ग्रहात् ॥ ७२ ॥
मीमांसकानां चत्वारो भेदास्तेषु कुटीचरः ।
बहूदकश्च हंसश्च तथा परमहंसकः ॥ ७३ ॥
कुटीचरो मठावासी यजमानपरिग्रही ।
बहूदको नदीतीरे स्नातो नैरस्यभैक्ष्यभुक् ॥ ७४ ॥
हंसो भ्रमति देशेषु तपःशोषितविग्रहः ।
यः स्यात्परमहंसस्तु तस्याचारं वदाम्यहम् ॥ ७५ ॥
स ईशानीं दिशं गच्छन् यत्र निष्ठितशक्तिकः ।
तत्रानशनमादत्ते वेदान्तध्यानतत्परः ॥ ७६ ॥

---

६७ न तु, इति पाठान्तरम् । ६८ त्रिर्जलम्, इति च पाठः । ७० षट्प्रमाण्यसौ, इत्यपि । ७३ ते तु, इति पाठान्तरम् ।

परः पर इहोत्कृष्टो याज्यास्तेषां तु वाडवाः ।
साङ्ख्यवत्प्रकृतेर्भेदाद् मोक्षो जीवस्य तन्मते ॥ ७७ ॥

गार्गीयस्मृतिमध्यगाः श्लोकाः—

त्रिदण्डी सशिखो यस्तु ब्रह्मसूत्री गृहच्युतः ।
सकृत् पुत्रगृहेऽश्नाति यो याति स कुटीचरः ॥ ७८ ॥
कुटीचरस्य रूपेण ब्रह्मभिक्षो जिताशनः ।
बहूदकः स विज्ञेयो विष्णुजापपरायणः ॥ ७९ ॥
ब्रह्मसूत्रशिखाहीनः कषायाम्बरदण्डभृत् ।
एकरात्रिं वसेद् ग्रामे नगरे च त्रिरात्रिकम् ॥ ८७ ॥
विप्राणामावसथेषु विधूमेषु गताग्निषु ।
ब्रह्मभिक्षां चरेद्धंसः कुटिकावासमाचरेत् ॥ ८१ ॥
हंसस्य जायते ज्ञानं तदा स्यात्परमो हि सः ।
चातुर्वर्ण्यप्रभोक्ता च स्वेच्छया दण्डभृत्तदा ॥ ८२ ॥
प्रपञ्चमिथ्या कठवल्लिका च ख्यातं जने भागवतं पुराणम् ।
इत्यादिशास्त्राणि बहूनि तेषां तत्सम्प्रदायस्तु कृशोऽत्र लोके ॥८३॥

इति जैमिनीयमतम् ।

अथ योगमतं ब्रूमः शैवमित्यपराभिधम् ।
ते दण्डधारिणः प्रौढकौपीनपरिधायिनः ॥ ८४ ॥
कन्थालिकाप्रावरणा जटापटलशालिनः ।
भस्मोद्धूलनकर्त्तारो नीरसाहारसेविनः ॥ ८५ ॥
दोर्मूले तुम्बकभृतः प्रायेण वनवासिनः ।
आतिथ्यकर्मनिरताः कन्दमूलफलाशनाः ॥ ८६ ॥
सस्त्रीका अथ निस्त्रीका निःस्त्रीकास्तेषु चोत्तमाः ।

---

७७ प्रकृतेर्भेदो, इत्यपि । ८३ कृशोऽत्र काले, इत्यपि ।

पञ्चाग्निसाधनपराः प्राणलिङ्गधराः करे ॥ ८७ ॥
विधाय दन्तपवनं प्रक्षाल्यांह्रिकाननम् ।
स्पृशन्ति भस्मनाऽङ्गं त्रिस्त्रिः शिवध्यानतत्पराः ॥ ८८ ॥
यजमानो वन्दमानो वक्ति तेषां कृताञ्जलिः ।
ॐ नमः शिवायेत्येवं शिवाय नम इत्यसौ ॥ ८९ ॥
तेषां च शङ्करो देवः सृष्टिसंहारकारकः ।
तस्यावताराः सारा ये तेऽष्टादश तदर्चिताः ॥ ९० ॥
तेषां नामान्यथ ब्रूमो नकुलीशोऽथ कौशिकः ।
गार्ग्यो मैत्र्यः कौरुषश्च ईशानः षष्ठ उच्यते ॥ ९१ ॥
सप्तमः पारगार्ग्यस्तु कपिलाण्डमनुष्यकौ ।
अपरकुशिकोऽत्रिश्च पिङ्गलाक्षोऽथ पुष्पकः ॥ ९२ ॥
बृहदाचार्योऽगस्तिश्च सन्तानः षोडशः स्मृतः ।
राशीकरः सप्तदशो विद्यागुरुरथापरः ॥ ९३ ॥
एतेऽष्टादश तीर्थेशास्तैः सेव्यन्ते पदे पदे ।
पूजनं प्रणिधानं च तेषां ज्ञेयं तदागमात् ॥ ९४ ॥
अक्षपादो गुरुस्तेषां तेन ते ह्याक्षपादकाः ।
उत्तमां संयमावस्थां प्राप्ता नग्ना भ्रमन्ति ते ॥ ९५ ॥
प्रमाणानि च चत्वारि प्रत्यक्षं लैङ्गिकं तथा ।
उपमानं च शाब्दं च तत्फलानि पृथक् पृथक् ॥ ९६ ॥
तत्त्वानि षोडशामुत्र प्रमाणादीनि तद्यथा ।
प्रमाणं च प्रमेयं च संशयश्च प्रयोजनम् ॥ ९७ ॥
दृष्टान्तोऽप्यथ सिद्धान्तोऽवयवस्तर्कनिर्णयौ ।
वादो जल्पो वितण्डा च हेत्वाभासाश्छलानि च ॥ ९८ ॥

---

९२ सप्तमोऽपरगार्गिश्च, इत्यपि ।

९८ दृष्टान्तोऽथ च, इति पाठान्तरम् ।

जातयो निग्रहस्थानान्येषां व्ययस्तु दुस्तरः ।
आत्यन्तिकस्तु दुःखानां वियोगो मोक्ष उच्यते ॥ ९९ ॥
जयन्ताचार्यरचितो न्यायतर्कोऽतिदुस्तरः ।
अन्यस्तूदयनाचार्यो ग्रन्थप्रासादसूत्रभृत् ॥ १०० ॥
भासर्वज्ञो न्यायसारतर्कसूत्रविधायकः ।
न्यायसाराभिधे तर्के टीका अष्टादश स्फुटाः ॥ १ ॥
न्यायभूषणनाम्नी तु टीका तासु प्रसिद्धिभाक् ।
अयमेषां विशेषस्तु यत्प्रजल्पन्ति पर्षदि ॥ २ ॥
शैवीं दीक्षां द्वादशाब्दीं सेवित्वा योऽपि मुञ्चति ।
दासीदासोऽपि भवति सोऽपि निर्वाणमृच्छति ॥ ३ ॥
एतेषु निर्विकारा ये मीमांसां दर्शयन्ति ते ।
तत्र पद्यमिदं चास्ति मोक्षमार्गप्ररूपकम् ॥ ४ ॥

न स्वर्धुनी न फणिनो न कपालदाम
　　नेन्दोः कला न गिरिजा न जटा न भस्म ।
यत्रास्ति नान्यदपि किञ्चिदुपास्महे तद्
　　रूपं पुराणमुनिशीलितमीश्वरस्य ॥ ५ ॥

स एव योगिनां सेव्यो योऽर्वाचीनस्तु योगभाक् ।
स ध्यायमानो राज्यादिसुखलुब्धैर्निषेव्यते ॥ ६ ॥

उक्तं च तैः स्वयोगशास्त्रे—

वीतरागं स्मरन् योगी वीतरागत्वमश्नुते ।
सरागं ध्यायतः पुंसः सरागत्वं तु निश्चितम् ॥ ७ ॥
येन येन हि भावेन युज्यते यन्त्रवाहकः ।
तेन तन्मयतां याति विश्वरूपो मणिर्यथा ॥ ८ ॥
श्रुतानुसारतः प्रोक्तं नैयायिकमतं मया ।

---

९९ व्यापस्तु, इत्यपि । १००—सूत्रकृत्, इत्यपि । ५ यत्रान्यदेव न च किञ्चि, इत्यपि पाठः । ६ भोगभाक्, इत्यपि । ७ ध्यायतस्तस्य, इत्यपि ।

एतेषामेव शास्त्रेभ्यस्तांस्तान् भावान् विदुर्बुधाः ॥ ९ ॥
एतेषां यजमानस्तु सुताराहृदयेश्वरः ।
सत्यवादी हरिश्चन्द्रो रामलक्ष्मणपूर्वजः ॥ १० ॥
भरटानां व्रतादाने वर्णव्यक्तिर्न काचन ।
यस्य पुनः शिवे भक्तिर्व्रती स भरटो भवेत् ॥ ११ ॥
अमीषां सर्वतीर्थेषु भरटा एव पूजकाः ।
शेषा नमस्कारकराः सोऽपि कार्यो न सन्मुखः ॥ १२ ॥

इति शैवम् ।

अथ वैशेषिकं ब्रूमः पाशुपतान्यनामकम् ।
लिङ्गादि यौगवत्तेषां ते ते तीर्थकरा अपि ॥ १३ ॥
वैशेषिकाणां योगेभ्यो मानतत्त्वगता भिदा ।
प्रत्यक्षमनुमानं च मते तेषां प्रमाद्वयम् ॥ १४ ॥
अवशेषप्रमाणानामन्तर्भावोऽत्र तैर्मतः ।
तत्त्वानि तु षडेवात्र द्रव्यप्रभृतिकान्यहो ! १५ ॥
द्रव्यं गुणस्तथा कर्म सामान्यं च चतुर्थकम् ।
विशेषसमवायौ च तत्त्वषट्कं हि तन्यते ॥ १६ ॥
तत्र द्रव्यं नवधा भूजलतेजोऽनिलान्तरिक्षाणि ।
कालदिगात्ममनांसि च गुणः पुनः पञ्चविंशतिधा ॥ १७ ॥
स्पर्शरसरूपगन्धाः शब्दः सङ्ख्या विभागसंयोगौ ।
परिमाणं च पृथक्त्वं तथा परत्वापरत्वे च ॥ १८ ॥
बुद्धिः सुखदुःखेच्छा धर्माधर्मप्रयत्नसंस्काराः ।
द्वेषः स्नेहगुरुत्वे द्रवत्ववेगौ गुणा एते ॥ १९ ॥
उत्क्षेपावक्षेपावाकुञ्चनकं प्रसारणं गमनम् ।

१०—पूर्वजाः, इति पाठान्तरम् । ११ यस्य यस्य, इत्यपि । १५ अथ तत्त्वानि षड् ब्रूमो,— इत्यपि पाठः ।

पञ्चविधं कर्मैतत् परापरे द्वे तु सामान्ये ॥ २० ॥
तत्र परं सत्ताख्यं द्रव्यत्वाद्यपरमथ विशेषस्तु ।
निश्चयतो नित्यद्रव्यवृत्तिरन्त्यो विनिर्दिष्टः ॥ २१ ॥
य इहायुतसिद्धानामाधाराधेयभूतभावानाम् ।
संबन्ध इह प्रत्ययहेतुः स च भवति समवायः ॥ २२ ॥
यौगे वैशेषिके तन्त्रे प्रायः साधारणी क्रिया ।
आचार्यः शङ्कर इति नाम प्रागभिधापरम् ॥ २३ ॥
अमीषां तर्कशास्त्राणि षट् सहस्राणि कन्दली ।
श्रीधराचार्यरचिता प्रशस्तकरभाष्यकम् ॥ २४ ॥
तत्र सप्तशती मानं सूत्रं तु त्रिंशतीमितम् ।
व्योमशिवाचार्यकृता टीका व्योममतिर्मता ॥ २५ ॥
सा स्यान्नव सहस्राणि परा तु किरणावली ।
सा तूदयनसंदब्धा उद्देशात् षट्सहस्रिका ॥ २६ ॥
श्रीवत्साचार्यरचिता टीका लीलावती मता ।
साऽपि स्यात् षट् सहस्राणि एकं त्वात्रेयतन्त्रकम् ॥ २७ ॥
तत्तु संप्रति व्युच्छिन्नं शिष्या मन्दोद्यमा यतः ।
आचारव्यवहारौ च प्रायश्चित्तं च ते विदुः ॥ २८ ॥
जीवस्यात्यन्तिको दुःखवियोगो मोक्ष इष्यते ।
यौगानां च तथैवोक्तः प्रायः साधर्मिका यतः ॥ २९ ॥
शिवेनोलूकरूपेण कणादस्य मुनेः पुरः ।
मतमेतत् प्रकथितं तत औलूक्यमुच्यते ॥ ३० ॥
अक्षपादेन ऋषिणा रचितत्वात्तु यौगिकम् ।
आक्षपादमिति ख्यातं प्रायस्तुल्यं मतद्वयम् ॥ ३१ ॥

इति वैशेषिकम् ।

---

२५ तत्तु, इत्यपि, —मतिः स्मृता, इति च । २९ उच्यते, इत्यपि ।

अथ बौद्धमतं वक्ष्ये मौण्ड्यं कृत्तिः कमण्डलुः ।
लिङ्गं तेषां रक्तवस्त्रं वेषः शौचक्रिया बहुः ॥ ३२ ॥
धर्मबुद्धसङ्घरूपं तेषां रत्नत्रयं मतम् ।
तारा देवी पुनस्तेषां सर्वविघ्नोपघातिनी ॥ ३३ ॥
सप्त तीर्थङ्करास्तेषां कण्ठे रेखात्रयाङ्किताः ।
विपश्यी १शिखी २विश्वभूः ३ककुच्छन्दश्च ४काञ्चनः ५ ॥ ३४ ॥
कश्यपश्च ६ सप्तमस्तु शाक्यसिंहोऽर्कबान्धवः ।
तथा राहुलसूः सर्वार्थसिद्धो गौतमान्वयः ॥ ३५ ॥
मायाशुद्धोदनसुतो देवदत्ताप्रजश्च सः ।
शौद्धोदनिर्धर्मकीर्तिप्रमुखा गुरवो मताः ॥ ३६ ॥
प्रत्यक्षमनुमानं च द्वे प्रमाणे तु तन्मते ।
चतुर्णामार्यसत्यानां दुःखादीनां प्ररूपकः ॥ ३७ ॥
सर्वज्ञस्तन्मते बुद्धः स प्रमेयचतुष्कवाक् ।
दुःखं समुदयो मार्गो निरोधश्चेति तात्त्विकम् ॥ ३८ ॥
दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्तिताः ।
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च ॥ ३९ ॥
समुदेति यतो लोके रागादीनां गणोऽखिलः ।
आत्माऽऽत्मीयस्वभावाख्यः समुदयः स उदाहृतः ॥ ४० ॥
क्षणिकाः सर्वसंस्कारा इत्येवं वासना तु या ।
स मार्ग इह विज्ञेयो निरोधो मोक्ष उच्यते ॥ ४१ ॥
सुगताचारलग्नस्य ज्ञाननिर्मलता हि या ।
सा मुक्तिर्मन्यते बौद्धैः कैश्चित् कैश्चिच्चितः क्षयः ॥ ४२ ॥
आत्मानं मन्वते नैते ज्ञानमेव तु मन्यते ।

---

३५ काश्यपस्तु, इत्यपि । ३६ पुरुषा मताः, इति च । ३७ प्रमाणे च इति पाठान्तरम् । ४२ केचिच्च चित्क्षयम्, इत्यपि ।

भवान्तरे सहचरं संतानस्थं क्षणक्षयि ॥ ४३ ॥
चत्वारो बौद्धभेदा. स्युर्भक्तिस्तेषां पृथक् पृथक् ।
काव्यादमुष्माद् ज्ञातव्यास्तन्मयप्रतिपादितान् ॥ ४४ ॥
अर्थो ज्ञानसमन्वितो मतिमता वैभाषिकेणेष्यते
प्रत्यक्षेण हि बाह्यवस्तुविसरः सौत्रान्तिकैराश्रितः ।
योगाचारमतानुगैरभिमता साकारबुद्धिः परा
मन्यन्ते बत मध्यमाः कृतधियः स्वच्छां परां संविदम् ॥ ४५ ॥
तर्कभाषा हेतुबिन्दुर्न्यायबिन्दुस्तथाऽर्चटः ।
तर्कः कमलशीलश्च तथा न्यायप्रवेशकः ॥ ४६ ॥
ज्ञानपारमिताद्यास्तु ग्रन्थाः स्युर्दश तन्मते ।
प्रासादा वर्तुलास्तेषां बुद्धाण्डक इति स्मृताः ॥४७॥
मृद्वी शय्या प्रातरुत्थाय पेया
मध्ये भक्तं पानकं चापराह्णे ।
द्राक्षाखण्ड शर्करा चार्द्धरात्रे
मोक्षश्चान्ते शाक्यसिंहेन दृष्टः ॥ ४८ ॥

इति बौद्धमतम् ।

उक्ता लिङ्गादयो भेदा दर्शनानां शिवैषिणाम् ।
तद्विस्तरस्तु न प्रोक्तो ग्रथाज्ञानमुदीरितः ॥ ४९ ॥
अष्टाङ्गयोगसिद्ध्यर्थं दध्युर्लिङ्गानि लिङ्गिनः ।
सर्वे प्राहुस्तमष्टाङ्गं तत्स्वरूपं वदाम्यथ ॥ ५० ॥
अहिंसासूनृतास्तेयब्रह्माकिञ्चनता यमाः ।
नियमाः शौचं सन्तोषः स्वाध्यायतपसी अपि ॥ ५१ ॥

---

४४ –स्तु शाक्तस्तेषाम्, इति पाठान्तरम् । ४५ प्रत्यक्षो नहि बाह्य,–इत्यपि । सौत्रान्तिकैराश्रितः, इति च । ४७ बौद्धाण्डक इत्यपि ४९ तद्विस्तरो ह्यनन्तोक्ति-र्यया– इत्यपि । ५० वदाम्यहम्, इत्यपि ।

देवताप्रणिधानं च करणं पुनरासनम् ।
प्राणायामः प्राणयमः श्वासप्रश्वासरोधनम् ॥ ५२ ॥
प्रत्याहारस्त्विन्द्रियाणां विषयेभ्यः समाहृतिः ।
धारणा तु क्वचिद् ध्येये चित्तस्य स्थिरबन्धनम् ॥ ५३ ॥
ध्यानं तु विषये तस्मिन्नेकप्रत्ययसंततिः ।
समाधिस्तु तदेवार्थमात्राभासनरूपकम् ॥ ५४ ॥
एवं योगो यमाद्यङ्गैरष्टभिः संमतोऽष्टधा ।
मोक्षोपायो योगो ज्ञानश्रद्धानचरणात्मकः ॥ ५५ ॥
निवर्त्तको भवेद् धर्मो दर्शनानां शिवैषिणाम् ।
राज्यादिभोगमिच्छूनां गृहिणां तु प्रवर्तकः ॥ ५६ ॥
सर्वसावद्यविरतिर्धर्मः सिद्धयै निवर्त्तकः ।
इष्टापूर्त्तादिको धर्मो भवेद् भूत्यै प्रवर्त्तकः ॥ ५७ ॥
धर्माधर्मविधातारं जीवं दर्शनिनो विदुः ।
नास्तिकास्तं न मन्यन्ते पुण्यापुण्यबहिर्मुखाः ॥ ५८ ॥
तेऽधिपर्षद् वदन्त्येवं नास्ति जीवा न कर्म च ।
धर्माधर्मौ न विद्येते ततः किं नु तयोः फलम् ? ॥ ५९ ॥
एतावानेव लोकोऽयं यावानिन्द्रियगोचरः ।
भद्रे ! वृकपदं पश्य यद् वदन्त्यबहुश्रुताः ॥ ६० ॥
पिब खाद च चारुलोचने ! यदतीतं वरगात्रि ! तन्न ते ।
न हि भीरु ! गतं निवर्त्तते समुदयमात्रमिदं कलेवरम् ॥ ६१ ॥
पृथ्वी जलं तथा तेजो वायुर्भूतचतुष्टयम् ।
प्रमाणभूमिरेतेषां मानं त्वक्षजमेव हि ॥ ६२ ॥
पृथ्व्यादिभूतसंहत्या यथा देहादिसङ्गतिः ।

५४–मात्राध्यासनपूर्वकम्, इति च । ६० यद् वदन्ति बहुश्रुताः, इत्यपि ।
६२ किञ्च पृथ्वी जलं तेजः, इत्यपि ।

मदशक्तिः सुराऽङ्गेभ्यो यद्वत् तद्वच्चिदात्मता ॥ ६३ ॥
तस्माद् दृष्टपरित्यागाद् यददृष्टे प्रवर्त्तनम् ।
तद्धि लोकस्य मूढत्वं चार्वाकाः प्रतिषेदिरे ॥ ६४ ॥
क्रमेण खण्डनं तेषां जीवन्नावत्प्रपद्यताम् ।
अहं दुःखी सुखी चाहमिति प्रत्यययोगतः ॥ ६५ ॥
घटं वेद्म्यहमित्यत्र त्रितयं प्रतिभासते ।
कर्म क्रिया च कर्त्ता च, तत्कर्त्ता किं निषिध्यते ? ॥६६ ॥
शरीरमेव चेत्कर्तृ, न कर्तृ, तदचेतनम् ।
भूतचैतन्ययोगाच्च चेतनं, तदसङ्गतम् ॥ ६७ ॥
मया दृष्टं श्रुतं स्पृष्टं घ्रातमास्वादितं स्मृतम् ।
इत्येककर्तृका भावा भूतचिद्वादिनः कथम् ? ॥ ६८ ॥
स्वसंवेदनतः सिद्धे स्वदेहे चेतनात्मनि ।
परदेहेऽपि तत्सिद्धिरनुमानेन साध्यते ॥ ६९ ॥
बुद्धिपूर्वा क्रिया दृष्टा स्वदेहेऽन्यत्र तद्गतिः ।
प्रमाणबलतः सिद्धा चेतना नातिवार्यते ॥ ७० ॥
तत्परलोकिनः सिद्धौ कर्मबन्धो न दुर्घटः ।
विचित्राध्यवसायस्थः स हि बध्नात्यनादितः ॥ ७१ ॥
पुण्यपापमयं कर्म चीयते वाऽपचीयते ।
तद्वशात् सुखदुःखानि न तु यादृच्छिकान्यहो ! ॥ ७२ ॥
नित्यं सत्त्वमसत्त्वं वा हेतोरन्यानपेक्षणात् ।
अपेक्षातो हि भावानां कादाचित्कत्वसम्भवः ॥ ७३ ॥
स्तन्यपानाभिलाषो यत् प्रथमं बालके भवेत् ।
पूर्वजन्माभ्यासतोऽसौ तस्मिन् जन्मन्याशिक्षणात् ॥ ७४ ॥

---

७० केन नाम निवार्यते ?, इत्यपि । ७१ तत्परलोकिनि सिद्धे, इति च । ७४ जन्मन्यपि क्षणात्, इत्यपि ।

तस्मान्नास्तिकवाक्येषु रतिः कर्तुं न युज्यते ।
आत्मा ज्ञानी कर्ममुक्तः परलोकी च बुध्यताम् ॥ ७५ ॥

स चाष्टाङ्गेन योगेन कर्मोन्मूल्य समन्ततः ।
आप्नोति मुक्तिं तत्रोच्चैरानन्दं स्वादयत्यहो ! ॥ ७६ ॥

सादिकमनन्तमनुपममव्याबाधं स्वभावजं सौख्यम् ।
प्राप्तः स केवलज्ञानदर्शनो मोदते मुक्तः ॥ ७७ ॥

सर्वथाऽप्यजिघांसूनां गुरुदेवहितैषिणाम् ।
अदीर्घमत्सराणां च मुक्तिरासन्नवर्तिनी ॥ ७८ ॥

कालस्वभावनियतिचेतनेतरकर्मणाम् ।
भवितव्यतया पाके मुक्तिर्भवति नान्यथा ॥ ७९ ॥

बालावबोधनकृते मलधारिसूरिः
श्रीराजशेखर इति प्रथमानबुद्धिः ।
सम्यग्गुरोरधिगतोत्तमतर्कशास्त्रः
षड्दर्शनीमिति मनाक् कथयांबभूव ॥ १८० ॥

इति श्रीराजशेखरसूरिकृतः षड्दर्शनसमुच्चयः ।

---

७५ कर्मयुक्तः, इत्यपि । ७६ प्राप्नोतीत्यपि । ७८ सर्वत्राप्यजिघांसूनाम्, इति च । १८० प्रथितोरुबुद्धिरित्यपि । स तां कथयांबभूव, इति च ।

" ये वर्णा द्विजभूपतिप्रभृतयस्तेषां च या या भिदा
यैर्धर्माः प्रतिपादिताः स्मृतिशतेष्वेषां पुराणेषु च ।
वेदेष्वप्यनुवासरं सरभसं श्रव्याः प्रगल्भैरमुं
मुक्त्वा हिंसकमार्गमेषु परमं कारुण्य ····· ॥ १८१ ॥
····· न्यखिलानि भक्तिभरतः संसेवितानि ध्रुवं
तैर्मन्त्राः सकलाः किलाऽभिमतदाः सर्वेऽपि सम्यग् मताः ।
आराद्धा गुरवश्च तैर्व्रतभृतस्तप्तं च तैः सत्तपो-
यैः कारुण्यमयैः सुजैनमतगैः प्राप्तं पदं निश्चलम् ॥ १८२ ॥
इति षड्दर्शनसमुच्यमानः पठ्यमानो नन्दतात् " ।

इत्यणहिल्लपुरपत्तनभाण्डागारस्थपुस्तकेऽधिकः पाठो दृश्यते ।